# विभक्तिः अभ्यासपत्राणि

## २२ – ११.०६.२०१६

व्योम-संस्कृत-पाठशाला
www.sanskritfromhome.in

# अभ्यासः – १

# करोति - करणम्

- पठति
- लिखति
- गच्छति
- खादति
- क्रीडति
- भुङ्क्ते
- शृणोति
- गायति
- चिन्तयति
- गणयति
- कथयति
- नृत्यति
- उपविशति
- प्रविशति
- तिष्ठति
- प्रतिष्ठते
- आगच्छति
- वदति
- पचति
- पश्यति
- पिबति
- यच्छति
- स्वीकरोति
- धावति

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – १ - उत्तराणि

## करोति - करणम्

- पठति - पठनम्
- लिखति - लेखनम्
- गच्छति - गमनम्
- खादति - खादनम्
- क्रीडति - क्रीडनम्
- भुङ्क्ते - भोजनम्
- शृणोति - श्रवणम्
- गायति - गानम्
- चिन्तयति - चिन्तनम्
- गणयति - गणनम्
- कथयति - कथनम्
- नृत्यति - नर्तनम्
- उपविशति - उपवेशनम्
- प्रविशति - प्रवेशनम्
- तिष्ठति - स्थानम्
- प्रतिष्ठते - प्रस्थानम्
- आगच्छति - आगमनम्
- वदति - वदनम्
- पचति - पचनम्
- पश्यति - दर्शनम्
- पिबति - पानम्
- यच्छति - दानम्
- स्वीकरोति - स्वीकरणम्
- धावति - धावनम्

# अभ्यासः - २

## करोति - कृतिः

- सृजति
- भजति
- वक्ति
- गच्छति
- प्राप्नोति

## करोति - कर्ता

- गच्छति
- शृणोति
- वक्ति
- ददाति
- पचति

## पचति - पाचकः

- पठति
- अध्यापयति
- नृत्यति
- लिखति
- गायति
- वादयति
- पृच्छति
- हरति
- कर्षति
- बोधयति

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – २ - उत्तराणि

करोति - कृतिः

- सृजति - सृष्टिः
- भजति - भक्तिः
- वक्ति - उक्तिः
- गच्छति - गतिः
- प्राप्नोति - प्राप्तिः

करोति - कर्ता

- गच्छति - गन्ता
- शृणोति - श्रोता
- वक्ति - वक्ता
- ददाति - दाता
- पचति - पक्ता

पचति - पाचकः

- पठति - पाठकः
- अध्यापयति - अध्यापकः
- नृत्यति - नर्तकः
- लिखति - लेखकः
- गायति - गायकः
- वादयति - वादकः
- पृच्छति - पृच्छकः
- हरति - हारकः
- कर्षति - कर्षकः
- बोधयति - बोधकः

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ३

- महाभारतं (व्यासः) कृतिः ।
- (उपाध्यायः) वचनं छात्राः पालयन्ति ।
- (गौरी) गानं बहु मधुरम् ।
- (रमा) नृत्यम् अहम् इच्छामि ।
- (मित्राणि) गमनेन वयं दुःखिताः ।
- (लवकुशौ) क्रीडा सीताम् आनन्दयति ।

# अभ्यासः – ३ - उत्तराणि

- महाभारतं व्यासस्य कृतिः ।
- उपाध्यायस्य वचनं छात्राः पालयन्ति ।
- गौर्याः गानं बहु मधुरम् ।
- रमायाः नृत्यम् अहम् इच्छामि ।
- मित्राणां गमनेन वयं दुःखिताः ।
- लवकुशयोः क्रीडा सीताम् आनन्दयति ।

# अभ्यासः - ३

- (भासः) उक्तिः हासं जनयति ।
- (अम्बा) पाकः रुचिकरः ।
- (हरिण्यः) धावनं मनोहरं भवति ।
- (राजेन्द्रः) लेखः मया न पठितः ।
- (द्रौपदी) हासेन दुर्योधनस्य कोपः उत्पन्नः ।
- आज्ञा (गुरवः) ह्यविचारणीया ।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ३ - उत्तराणि

- भासस्य उक्तिः हासं जनयति ।
- अम्बायाः पाकः रुचिकरः ।
- हरिणीनां धावनं मनोहरं भवति ।
- राजेन्द्रस्य लेखः मया न पठितः ।
- द्रौपद्याः हासेन दुर्योधनस्य कोपः उत्पन्नः ।
- आज्ञा गुरूणां ह्यविचारणीया ।

# अभ्यासः - ४

- (रघुवंशम्) कर्ता कालिदासः ।
- (लोकः) सृष्टिः भगवता कृता ।
- महाराजः दरिद्रेभ्यः (वस्त्राणि) दानं करोति ।
- (वेदाः) श्रवणं पुण्यप्रदम् ।
- कृषिकः (क्षेत्रम्) कर्षणं करोति ।
- (ताराः) गणनं न शक्यम् ।

# अभ्यासः – ४ - उत्तराणि

- रघुवंशस्य कर्ता कालिदासः ।
- लोकस्य सृष्टिः भगवता कृता ।
- महाराजः दरिद्रेभ्यः वस्त्राणां दानं करोति ।
- वेदानां श्रवणं पुण्यप्रदम् ।
- कृषिकः क्षेत्रस्य कर्षणं करोति ।
- ताराणां गणनं न शक्यम् ।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ४

- (कथा) कथनम् आसक्तिकरम् आसीत् ।
- (लेखनी) क्रयणं कर्तुम् अहम् आपणं गच्छामि ।
- सः (उत्तमश्लोकाः) रचनं करोति ।
- सर्वैः (धर्मः) पालनं कर्तव्यम् ।
- शुनकः (गृहम्) रक्षणं करोति ।
- (फलानि) खादनं स्वास्थ्यं वर्धयति ।

# अभ्यासः – ४ - उत्तराणि

- कथायाः कथनम् आसक्तिकरम् आसीत् ।
- लेखन्याः क्रयणं कर्तुम् अहम् आपणं गच्छामि ।
- सः उत्तमश्लोकानां रचनं करोति ।
- सर्वैः धर्मस्य पालनं कर्तव्यम् ।
- शुनकः गृहस्य रक्षणं करोति ।
- फलानां खादनं स्वास्थ्यं वर्धयति ।